National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2018; 1(20): 86-88
© 2018 NJHSR
www.sanskritarticle.com

डॉ.लक्ष्मीनारायणबेहेरा
सहायकाचार्यः,शिक्षाशास्त्रविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

**Correspondence:**
डॉ.लक्ष्मीनारायणबेहेरा
सहायकाचार्यः,शिक्षाशास्त्रविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

# कारणमाला-एकावली-दीपक-स्वभावोक्त्यलङ्कारेषु शैक्षिकी दृष्टिः

**डॉ.लक्ष्मीनारायणबेहेरा**

यद्यपि प्रारम्भिकस्तरे संस्कृतशिक्षणे विषयगतकाठिन्यं न भवति तथापि तत्र अध्यापनगतं काठिन्यं तु भवत्येव। पाठ्यवस्तुनः चयनं, गृहीतानि कौशलानि, अध्यापने व्यवहृताः विधयः, छात्रेषु रूच्युत्पादनं, शिक्षणसूत्राणा-मुपयोगः इत्यादयः अंशाः प्रारम्भिकस्तरस्याध्यापने अवश्यमेव ध्यातव्याः। इत्येतेषामभावे प्रारम्भिकस्तरे अध्यापनं निष्फलतामेति।

अनुसन्धानेन ज्ञातं यत् पद्यशिक्षणावसरे विषयवस्तुरूपेण नीतिश्लोकानां प्रासङ्गिकता उपयोगिता च सर्वदैव प्रमाणितास्ति। तदर्थमेव केन्द्रराज्यस्व-कारीयेषु पाठ्यपुस्तकेषु असर्वकारीयपाठ्यपुस्तकेषु च प्रारम्भिकस्तरे नीतिपरक-श्लोकान् योजयन्ति। ते च श्लोकाः छात्रयोग्यतानुकूलाः, क्लिष्टरहिताः, माधुर्य-पूर्णाः, स्मरणयोग्याः च भवेयुः। केषुचित् स्थलेषु यद्येते श्लोकाः उपर्युक्तगुणरहिताः भवन्ति तर्हि छात्राधिगमक्रिया स्वाभाविकी न भवति।

यद्येते श्लोकाः कारणमाला-एकावलीत्यादीनां अलङ्काराणां सिद्धान्तमनुसृत्य रचिताः सन्ति तर्हि अवबोधने सौकर्यं, कण्ठस्थीकरणे सौविध्यं च भवति। तदाधारिताः बहवः श्लोकास्तु विभिन्नपाठ्य-पुस्तकेषु समाहिताः सन्ति।

आदौ ज्ञातव्यं यत् इत्यनयोः अलङ्कारयोः लक्षणं किमिति।

कारणमालायाः लक्षणं यथा-

**परं परं प्रति यदा पूर्वं पूर्वस्य हेतुता।**
**तदा कारणमाला स्यात्....।।**[१]
**यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता।**
**तदा कारणमाला स्यात्................।।**[२]

पूर्वपदार्थाः उत्तरपदार्थानां हेतवः भवन्ति, ते च क्रमबद्धरीत्या संयोजिताः सन्ति तर्हि तत्र कारणमालालङ्कारः भवतीति ज्ञातव्यम्। काव्येषु तु इत्यस्याधारेण बहवः श्लोकाः विरचिताः। नीतिशास्त्रेषु अपि कारणमालालक्षणानुकुलानि नैकानि उदहरणानि सम्प्राप्यन्ते। तानि च उदाहरणानि छात्रादृतानि रूच्युत्पादकानि च भवन्ति। यथा-

**विद्या ददाति विनयं विनयात् याति पात्रताम्।**
**पात्रत्वात् धनमाप्नोति धनाद्धर्मस्ततः सुखम्।।**
**क्रोधात् जायते सम्मोहः सम्मोहात् स्मृतिविभ्रमः।**
**स्मृतिनाशात् बुद्धिनाशः बुद्धिनाशात् प्रणस्यति।।**[३]
**जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते**
**गुणप्रकर्षेण जनानुरज्यते जनानुरागप्रभवा हि सम्पदः।।**[४]

इत्येतेषु उदाहरणेषु पूर्वपदानि तदुत्तरपदानां कारणानि भवन्ति। तस्यैवसिद्धान्तस्यानुसरणं

एकावलीअलङ्कारे अपि परिलक्ष्यते।
'एकावली' इत्यलङ्कारस्य लक्षणं यथा-

**पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम्।**
**स्थाप्यतेऽपोह्यते वा चेत् स्यात् तदैकवली।।**[५]

अर्थात् पूर्ववस्तूनि प्रति उत्तरवस्तूनि विशेषणत्वेन स्थापितानि निषिद्धानि वा भवन्ति चेत् एकावली।

एकवलीसिद्धान्तानुसृतः नीतिश्लोकः यथा-

**न सा सभा यत्र न सन्ति बृद्धाः**
**बृद्धाः न ते ये न वदन्ति धर्मम्।**
**नासौ धर्मो यत्र न च नास्ति सत्यम्**
**तत्सत्यं यच्छलेनाभ्युपेतम्।।**[६]

एवमेव नैके श्लोकाः प्रारम्भिकस्तरपाठ्यक्रमे स्थाप्यन्ते। इत्यनयोः अलङ्कारयोः शैक्षिकमहत्त्वम् यथा-

१. संक्षिप्तवाक्यानां समाहारेण पूर्णवाक्यस्य संरचनं भवतीति कारणात् अवगमनं सुलभं भवति छात्राणाम्।
२. खण्डान्वययोग्याः इमे श्लोकाः। खण्डान्तयस्तु प्राथमिक-माध्यमिक-स्तरयोः कृते अत्यन्तोपयुक्तः।
३. भाषागतक्लिष्टता इत्येतेषु न दृश्यते।
४. तथ्योपस्थापने क्रमबद्धता वर्त्ततेति कारणात् श्लोके विद्यमानस्य विषयवस्तुनः स्पष्टीकरणम् अत्यन्तं सुलभम्।
५. संस्कृतश्लोकान् प्रति छात्रेषु रुचेर्जागरणं भवितुमर्हति।

**क्रियापदशिक्षणोपकारकः दीपकालङ्कारः**

धातुरुपादीनां कण्ठस्थीकरणेन पदज्ञानं तु बर्द्धते एव। परन्तु पदानां वाक्येषु व्यवहारः तथा सुलभः न भवति। संस्कृतव्याकरणशिक्षणस्य किञ्चन उद्देश्यं वर्त्तते यत् छात्राः क्रियापदानां प्रयोगे सक्षमाः भवेयुः। अनुवादेन एतत्कार्यं किञ्चित् भवत्येव, परन्तु छात्रैषु क्रियापदप्रयोगसामर्थ्यता तथा नागच्छति। अधुनातनसंस्कृतशिक्षायां संस्कृतक्रियापदानां बहुलप्रयोगः न भवति। प्रायतः छात्राः गम्-पठ्-कृ-हस्-चल्-भू-इत्यादीनां दैनन्दिनव्यवहारोपयुक्तानां धातूनां प्रयोगे एव दत्तावधानाः दृश्यन्ते। शताधिकक्रियापदानि प्रायतः छात्रैरूपेक्षितानि। अतः व्याकरणशिक्षणावसरे क्रियापदानां व्यावहारिकज्ञनं कथं देयमिति विचार्यमाणः प्रश्नः। अनुसन्धानेन ज्ञातं यत् क्रियापदानां प्रयोगसन्दर्भे दीपकालङ्कारः उपकरिष्यति एव। एकस्मिन्नेव वाक्ये श्लोके वा बहूनि क्रियापदानि प्रयुज्यन्ते चेत् छात्रः धातुरूपज्ञानेन सह पदानां प्रयोगोपयुक्ततमभिजानाति।

दीपकालङ्कारस्य "अप्रस्तुतप्रस्तुतयोदीपकं तु निगद्यते" इत्येतस्याः कारिकायाः प्रासङ्गिकतात्र नास्ति। प्रस्तुताप्रस्तुतचर्चा तु दीपकस्य भेदमात्रमित्यत् अस्माभिः ज्ञातव्यम्।
दीपकालङ्कारस्य लक्षणमित्थमस्ति-

**अप्रस्तुतप्रस्तुयोर्दीपकं तु निगद्यते।**
**अथ कारकमेकं स्यात् अनेकासु क्रियासु चेत्।**[७]

पुनश्च-

**सकृदवृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्।**
**सैव क्रियासु बह्वीषु कारकस्येति दीपकम्।।**[८]

कारिकयोः अन्तिमवाक्ययोः तात्पर्यमिदं यत् वाक्ये एकस्य कारकस्य कृते अनेकाः क्रियाः सन्निविष्टाः भवन्ति। क्रियापदानां प्रयोगबाहुल्यं छात्रेषु क्रियापदप्रयोगज्ञानमभिबर्द्धयतीति अनुसन्धात्रा अनुमीयते। उदाहरणैः एतस्य स्पष्टीकरणं भवितुमर्हति।
यथोदाहरणम्-

**दूरं समागतवती त्वयि जीवनाथे**
**भिन्ना मनोभवशरेण तपस्विनी सा।**
**उत्तिष्ठति स्वपिति वासगृहं त्वदीय-**
**मायाति याति हसति श्वसिति क्षणेन।।**[९]

अत्र प्राणनाथविप्रयुक्तायाः विरहदशा वर्णितास्ति। विरहरूपस्य कारकविशेषस्य विविधक्रियाः अत्र प्रतिपादिताः सन्ति। यथा नायिका उत्तिष्ठति, स्वपिति, आयाति, याति, हसति, श्वसिति इति। एवाम्भूतैः वाक्यैः बहूभिः क्रियाभिः धातुरूपैः वा सह छात्रः परिचितः भवति। संस्कृतव्याकरणशिक्षणावसरे एतादृशां क्रियादीपकालङ्कारगर्भितानां श्लोकानाम् उदाहरणानां च प्रासङ्गिकता वर्त्तते।

**पर्यावरणशिक्षोपयुक्तालङ्कारः स्वभावोक्तिः**

अलङ्कारास्तु रसोपकर्षकाः। विविधैरलङ्कारैः काव्यसौन्दर्यमभिबर्द्धतेति तात्पर्यम्। कटककुण्डलादयः शरीरशोभातिशायिनः अलङ्काराः विविधसांस्कृतिकसामाजिकादिषु उत्सवावसरविशिष्टेषु परिहिताः सन्तः अलङ्कारत्वं परिस्फुटयन्ति। यथा विवाहादिषु उत्सवेषु नायिका अलङ्कारैः विमण्डितास्ति चेत् अलङ्काराणामलङ्कारत्वं सिद्ध्यति। परन्तु विप्रलम्भपरिस्थितौ नायिकायाः शरीरे अलङ्कारप्राबल्यं दोषाय भवति। तद्वदेव प्राकृतिकवैभववर्णनपरकः स्वभावोक्त्य-लङ्कारः केषुचित् श्रृङ्गार-परिस्थितिषु उत्कर्षतामभिव्यनक्ति। यथा उद्यान-कानन-जलक्रीडा-मृगयावनविहारादिषु प्रसङ्गेषु अयमलङ्कारः भावोद्दीपने पूर्णसहायकः। तदर्थमेव उक्तमस्ति-

**"स्वभावोक्तिः रसौ चारू यथावद्वस्तुवर्णनम्।"**

अर्थात् कस्यचन वस्तुनः (जीवविशेषस्य, प्राकृतिकवैभवस्य वा) स्वाभाविकतायाः वर्णनं एव स्वभावोक्त्यालङ्कारः। अपि च प्रसङ्गानुसारं रसानुगुणवर्णनमेव एतस्यालङ्कारस्य महत्त्वम्।

पर्यावरणशिक्षायाः एकं विशिष्टम् अभिन्नं च उद्देश्यं वर्त्तते प्राकृतिकवैभवं प्रति विविधजीवविशेषं प्रति च छात्रेषु सकारात्मकाभिवृत्तेः जागरणम्। अयं स्वभावोक्त्यालङ्कारः यद्यपि कस्यचन वस्तुनः स्वाभाविकगतिक्रियादिषु अन्तर्हिता सम्बन्धिता च भूत्वा रसस्य उत्कर्षसाधने रसापकर्षौ संश्लिष्टोऽस्ति तथापि

प्रकारान्तरेण पाठकेषु प्राकृतिकदृश्यं जीवविशेषं वा प्रति सकारात्मकदृष्टिं सौन्दर्यानुभूतिं वा जनयति।

विविधकाव्यशास्त्रकारैः स्वभावक्त्यलङ्कारसन्दर्भे समुपस्थापितानि उदाहरणानि पर्यावरणतत्त्वपरिपूरकतां प्रतिपादयन्ति। काव्यदीपिकायां यथा-

**ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दते दत्तदृष्टिः**
**पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।**
**शस्पैरर्द्धावलीढैः श्रमविवृत्तमुखभ्रंशिभिः कीर्णवर्त्मा**
**पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्वा प्रयाति।।**[१०]

एवं प्रकारेण केषाञ्चन अलङ्काराणां शैक्षिकोपयोगः अनुसन्धात्रा आविष्कृतः।

**सन्दर्भग्रन्थसूची**

१. **सुभाषितरत्नभाण्डागारम्,** नारायण राम आचार्य, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी-२०१५
२. **किरातार्जुनीयम्,** भारविः, व्या.-डॉ बाबुराम पाण्डेय, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी-१९९८
३. **साहित्यदर्पणः,** विश्वनाथः, शेषराजशर्मरिग्मी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी-१९९६
४. **काव्यप्रकाशः,** मम्मटः, व्या. रघुनाथप्रसादद्विवेदी, चौखम्बा संस्कृत संस्थान, वाराणसी-२००२

**पादटिप्पणी**

१.सा.द.१०,का.-७६
२.का.प्र.१०.का.-६२
३.सुभाषितरत्नभाण्डागारः
४.किरातार्जुनीयम्, - प्रथमसर्गः
५.साहित्यदर्पणः, दशमपरिच्छेदः
६.सुभाषितरत्नभाण्डारः
७.सा.द.परि.का.-४८
८.का.प्र.दशमोल्लासः-१७ (कारिका)
९.सा.द.परि.उदा.
१०.अभिज्ञानशकुन्तलम्, प्रथमाङ्कः